केन्द्रीय विद्यालय संगठनम्, रायपुर संभागः

वार्षिक परीक्षा (2024-25)

कक्षा-षष्ठी **विषय: - संस्कृतम्** **पूर्णांकः 60**

.....

.....

सामान्य निर्देशा:-

1.अस्मिन प्रश्नपत्रे चत्वारःभागाःसन्ति|

खण्ड क- अपठित-अवबोधनम् = 10 अङ्काः

खण्ड ख- रचनात्मककार्यम् = 15 अङ्काः

खण्डग- अनुप्रयुक्तव्याकरणम् = 15 अङ्काः

खण्डघ - पठित-अवबोधनम् = 20 अङ्काः

2. समस्ता: प्रश्ना: अनिवार्या: सन्ति।

3.प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि।

.....

(खण्ड: क-अपठित-अवबोधनम् 10 अङ्काः)

प्रश्न.1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

एकस्मिन् नदीतटे एक: जंबूवृक्ष: आसीत्। तस्मिन् वृक्षे एक: वानर: प्रतिवसति स्म । स: नित्यं जंबूफलानि खादति स्म। कश्चिद् मकर: तस्याम् नद्याम् अवसत्। वानर: प्रतिदिनम् मकराय जंबूफलानि अयच्छत् । एवं मकर: तस्य मित्रम् अभवत्।

I.एकपदेन उत्तरत – 1x3=3

क –एकस्मिन् नदीतटे एक: कः आसीत्?

उत्तर:----------

ख – तस्मिन् वृक्षे एक: कः प्रतिवसति स्म?

उत्तर:----------

ग – वानर: प्रतिदिनम् कस्मै जंबूफलानि अयच्छत्?

उत्तर:----------

II.पूर्णवाक्येन उत्तरत-

2x2=4

क - कश्चिद् मकर: कुत्र अवसत्?

उत्तर:----------

ख – स: वानरः नित्यं कानि खादति स्म?

उत्तर:----------

III.भाषिक-कार्यम्- 1x3=3

क – **"शत्रु:"** इति पदस्य विलोम पदं किं प्रयुक्तम् ?

1 फलम् 2 धनम् 3 मित्रम्

ख– **"वृक्षे वानर: प्रतिवसति स्म |"** अत्र कर्ता पदं किम् अस्ति ?

1 वृक्षे 2 वानरः 3 प्रतिवसति स्म

ग– **"बन्दर"** इति पदस्य पर्याय पदं किं प्रयुक्तम् ?


1 वृक्षः 2 मकरः 3 वानरः

(खण्ड:ख –रचनात्मकलेखनम् –15 अङ्काः)

प्रश्न 2. स्व-कुटुम्बस्य परिचयं लिखन्तु – 1X5=5

1. मम नाम .....|
2. मम पितुः नाम .....|
3. मम पितामहस्य नाम ..... |
4. मम मातुः नाम .....|
5. मम अनुजस्य नाम ..... |

प्रश्न 3 चित्रे दर्शितस्य नाम लिंग च लिखन्तु – **½x10=5**



प्रश्नः4

यथा-

पुस्तकम्, घटी, लेखनी, कूपी,

उत्पीठिकायां घटी नास्ति।



खण्ड:ग-अनुप्रयुक्त-व्याकरणं–15 अङ्काः

प्रश्नः 5 अधोलिखितेभ्यः वाक्येभ्यः अव्ययपदानि चित्वा लिखन्तु – (कोई 4) 1X4=4

वाक्य	अव्यय
यथा – परमेश्वरः सर्वत्र अस्ति |	सर्वत्र
1. अमितः गृहात् बहि गच्छति |	.....
2. एकः वानरः वृक्षस्य उपरि तिष्ठति |	.....
3. छात्रः अत्र अस्ति |	.....

4. सः फलानि अधः क्षिपति | .....

5. तत्र एकः बिडालः अस्ति | .....

प्रश्नः 6. निम्नलिखितानि पर्यायपदानि मेलनं कृत्वा लिखत- (कोई 4) 1X4=4

(क) गजः – जलाशय:

(ख) पदम् – शशांक:

(ग) चद्र: – जनता

(घ) सरोवर: – चरण:

(ङ) प्रजा – हस्ती

प्रश्नः 7. उदाहरणानुगुण लोट्लकार रूपाणि लिखन्तु (कोई 4) 1X4=4

यथा – पठति - पठतु

1. क्रीडति .....
2. हसति .....
3. खादति .....
4. गच्छति .....
5. पश्यति .....

प्रश्न 8 – तालिकायां प्रदत्तानां शब्दानां षष्ठीविभक्तेःरूपाणि रिक्तस्थाने लिखन्तु - ½x6=3

पुंलिङ्गम्		स्त्रीलिङ्गम्		नपुंसकलिङ्गम्	
यथा - देवः	देवस्य	रमा	रमाया:	भवनम्	भवनस्य
द्वारपालः	.....	दोला	.....	वनम्	.....
विद्यालयः	.....	लेखनी	.....	गृहम्	.....

खण्ड:घ -पठित-अवबोधनम् –20 अङ्काः

प्रश्न 9 – पठित-गद्यांश पठित्वा अधोदत्तान्प्रश्नान् उत्तरत-

राधिका एषु दिनेषु कूर्दमाना एव चलति । यतः गृहे नूतनाः अतिथयः सन्ति । ते च विशिष्टाः सन्ति। माता, पुत्रौ पुत्र्यौ च मिलित्वा ते तत्र पञ्च सन्ति । अहोरात्रं तस्याः चिन्ता एकत्र एव गृहस्य छद्याः उपरि । तत्र एव तस्याः मनः अस्ति। कुतूहलम् अस्ति, के ते इति? ते न अन्ये, काचित् मार्जारी तस्याः चत्वारः शावकाः च

सन्ति। आम्, ते एव विशिष्टाः अतिथयः । सा तु तेषां नामानि अपि चिन्तितवती - तन्वी, मृद्वी, शबलः भीमः च इति ।

I. एकपदेन उत्तरत- **1X2 =2**

(क) का एषु दिनेषु कूर्दमाना एव चलति?

उत्तर:----------

(ख) गृहे नूतनाः के सन्ति?

उत्तर:----------

II. पूर्णवाक्येन उत्तरत- **1X2 =2**

(क) मार्जारी तस्याः कति शावकाः च सन्ति?

उत्तर:----------

(ख) के के मिलित्वा ते तत्र पञ्च सन्ति?

उत्तर:----------

प्रश्न 10- अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-

"उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः" ।।

I. एकपदेन उत्तरत- **1X2 =2**

(क) उद्यमेन हि सिध्यन्ति कानि?

उत्तर:----------

(ग) कैः कार्याणि न सिध्यन्ति?

उत्तर:----------

II. पूर्णवाक्येन उत्तरत- **1X2 =2**

(क) सुप्तस्य कस्य मुखे मृगाः न प्रविशन्ति?

उत्तर:----------

(ख) के सुप्तस्य सिंहस्य मुखे न प्रविशन्ति?

उत्तर:----------

प्रश्न 11- नाट्यांशं पठित्वा उत्तराणि लिखत-

अम्बा- राकेश ! कुत्र असि ? अत्र आगच्छ।

राकेश: -आम् अम्ब! कथय किं कार्यं करवाणि ?

अम्बा- अद्य तव तातः कार्यालयात् विलम्बेन आगमिष्यति। त्वम् आपणं गच्छ। वस्तूनि आनय। वस्तूनां नामावली अपि अत्र अस्ति।

राकेश: अस्तु। स्यूतं ददातु। वस्तूनां नामावलीम् अहं स्वीकरोमि।

अम्बा - स्वीकुरु। धनम् अपि नय।

राकेश: - अम्ब! इतोऽपि एकं वस्तु स्वीकरवाणि ?

अम्बा – चाकलेहम् इच्छति खलु वत्स ! जानातु, अधिकं चाकलेह-खादनं स्वास्थ्याय हानिकरं भवति |

I. एकपदेन उत्तरत- **1X2 =2**

(क) केषाम् नामावली अपि अत्र अस्ति?

उत्तर:----------

(ग) चाकलेह-खादनं कस्मै हानिकरं भवति?

उत्तर:----------

II. पूर्णवाक्येन उत्तरत- **1X2 =2**

1) कः कार्यालयात् विलम्बेन आगमिष्यति?

उत्तर:----------

---

2) किम् अपि नय?

उत्तर:----------

प्रश्न 12- अधोलिखितानां प्रश्नानाम् उत्तराणि "आम" अथवा "न" इति पदेन लिखन्तु - (केवल 3)

1X3 =3

यथा - ग्रामे कश्चन भिक्षुकः आसीत् | **आम्**

(क) भिक्षुकः उन्नत् आसीत् | .....

(ख) जनाः तस्मैः दण्डः यच्छन्ति । .....

(ग) भिक्षुकः प्रभूतं धनं इच्छति । .....

(घ) भिक्षुकः धनिकाय पादौ ददाति । .....

प्रश्न 13 - कोष्ठकात् समुचितम् संख्यां चित्वा रिक्तस्थानं पूरयन्तु- (केवल 3) **1X3=3**

एकम्, द्वौ, बहवः , द्वात्रिंशत्

1. मम ---------- शिरःअस्ति।
2. मम ---------- पादौस्तः ।

3. मम ---------- केशाःसन्ति ।

4. मम---------- दन्ताःसन्ति ।

प्रश्न 14 - कोष्ठकात् समुचितम् क्रियापदं चित्वा उदाहरणानुसारम् अङ्गस्य कार्यं लिखन्तु।½x4=2

यथा –नयनं - पश्यति

(क) मुखम् -.....। (चलति, धावति, वदति)

(ख) पादः -.....। (लिखति, चलति, पश्यति)

(ग) कर्णः -..... । (हसति, वदति, शृणोति)

(घ) नासिका -.....। (आघ्राणं करोति, नृत्यति, धावति)